# Shri Krishnacharitra Manjari

# શ્રીકૃષ્ણચારિત્રમઞ્જરી

## Document Information

Text title : Krishna Charitra Manjari

File name : kRRiShNachAritramanjarI.itx

Category : vishhnu, krishna, rAghavendra

Location : doc_vishhnu

Proofread by : NA

Latest update : May 22, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણચારિત્રમઞ્જરી

વિષ્ણુર્બ્રહ્માદિદેવૈઃ ક્ષિતિભરહરણે પ્રાર્થિતઃ પ્રાદુરાસીદ્
દેવક્યાં નન્દનન્દી શિશુવધવિહિતાં પૂતનાં યો જઘાન ।
ઉત્થાનૌત્સુક્યકાલે રથચરણગતં ચાસુરં પાદઘાતૈ-
શ્ચક્રાવર્તં ચ માત્રા ગુરુરિતિ નિહિતો ભૂતલે સોઽવતાન્મામ્ ॥ ૧॥

યો માતુર્જૃમ્ભમાણો જગદિદમખિલં દર્શયન્નઙ્ગુરૂઢો
ગર્ગેણાચીર્ણનામા કૃતરુચિરમહાબાલલીલો વયસ્યૈઃ ।
ગોપીગેહેષુ ભાણ્ડસ્થિતમુરુદયયા ક્ષીરદધ્યાદિ મુષ્ણન્
મૃન્ના ભક્ષીતિ માતુઃ સ્વવદનગજગદ્ભાસયન્ ભાસતાં મે ॥ ૨॥

દધ્નોમત્રસ્ય ભઙ્ગાદુપગમિતરુષા નન્દપત્ન્યાઽથ બદ્ધઃ
કૃચ્છ્રેણોલૂખલે યો ધનપતિતનયૌ મોચયામાસ શાપાત્ ।
નન્દાદ્યૈઃ પ્રાપ્ય વૃન્દાવનમિહ રમયન્ વેણુનાદાદિભિર્યો
વત્સાન્પાન્વત્સરૂપં ક્રતુભુગરિમથો પોથયન્સોઽવતાન્મામ્ ॥ ૩॥

રક્ષન્ વત્સાન્વયસ્યૈર્બકમભિનદથો તિગ્મતુણ્ડે ગૃહીત્વા
પ્રીતિં કર્તું સખીનાં ખરમપિ બલતો ઘાતયન્ કાલિયાહિમ્ ।
ઉન્મથ્યોદ્વાસ્ય કૃષ્ણામતિવિમલજલાં યો વ્યધાદ્દાવવહ્નિં
સુપ્તાનાવૃત્ય ગોષ્ઠે સ્થિતમપિબદસૌ દુષ્ટવૃક્ષચ્ચિદવ્યાત્ ॥ ૪॥

દુર્ગારણ્યપ્રવેશાચ્ચ્યુતનિજસરણીન્ ગોગણાનાહ્વયદ્યો
દાવાગ્નિં તત્ર પીત્વા સમપુષદનુગાન્ ગોપકાનાવિષિણ્ણાન્ ।
ગોભિર્ગોપૈઃ પરિતઃ સરિદુદકતટસ્થોપલે ભોજ્યમન્નં
ભુક્ત્વા વેણોર્નિનાદાદ્વ્રજગતવનિતાચિત્તહારી સ માઽવ્યાત્ ॥ ૫॥

કૃષ્ણોઽસ્માકં પતિઃ સ્યાદિતિ કૃતતપસાં મજ્જને ગોપિકાનાં
નગ્નાનાં વસ્ત્રદાતા દ્વિજવરવનિતાનીતમન્નં સમશ્નન્ ।
શ્રાન્તૈર્ગોપૈઃ સમં યો બલમથનબલાવાહૃતેઽસ્મિન્ સવૃષ્ટૌ
પ્રોદ્ધૃત્યાહાર્યવર્યં નિજજનમખિલં પાલયન્ પાત્વસૌ મામ્ ॥ ૬॥

ગોવિન્દાખ્યોઽથ તાતં જલપતિહૃતમાનીય લોકં સ્વકીયં
યઃ કાલિન્દ્યા નિશાયામરમયદમલજ્યોત્સ્નયા દીપિતાયામ્ ।
નન્દાદીનાં પ્રદર્શ્ય વ્રજગતવનિતાગાનકૃષ્ટાર્તચિત્તાઃ
ચાર્વઙ્ગીર્નર્મવાક્યૈઃ સ્તનભરનમિતાઃ પ્રીણયન્ પ્રીયતાં નઃ ॥ ૭॥

અન્તર્ધત્તે સ્મ તાસાં મદહરણકૃતે ત્વેકયા ક્રીડમાનઃ
સ્વસ્કન્ધારોહણાદ્યૈઃ પુનરપિ વિહિતો ગર્વશાન્ત્યૈ મૃગાક્ષ્યાઃ ।
ખિન્નાનાં ગોપિકાનાં બહુવિધનુતિભિર્યો વહન્ પ્રીતિમાવિઃ-
પ્રાપ્તો રાસોત્સવેન ન્યરમયદબલાઃ પ્રીયતાં મે હરિઃ સઃ ॥ ૮॥

હત્વા યઃ શઙ્ખચૂડં મણિમથ સમદાદગ્રજાયાર્તગોપી-
ગીતાનેકસ્વલીલો હતવૃષભમહાપૂર્વદેવોઽમરેડ્યઃ ।
કેશિપ્રાણાપહારી સુરમુનિવદનપ્રાર્થિતાશેષકૃત્યો
હત્વા પુત્રં મયસ્ય સ્વજનમપિહિતં મોચયન્ મોક્ષદઃ સ્યાત્ ॥ ૯॥

અક્રૂરાકારિતો યાન્ વ્રજયુવતિજનાન્સાન્ત્વયિત્વાઽભિતપ્તાન્
સ્વં રૂપં મજ્જતેઽસ્મૈ વિલસિતમહિગં દર્શયંસ્તેન વન્દ્યઃ ।
યો ગત્વા કંસધાનીં હૃતરજકશિરાશ્ચારુવેષઃ સુદામ્નઃ
પ્રીતિં કુર્વંસ્ત્રિવક્રાં વ્યતનુત રુચિરાં પૌરમહ્યોઽવતાત્સઃ ॥ ૧૦॥

શાર્વં ભઙ્ક્ત્વા ધનુર્યો બલમપિ ધનુષો રક્ષકં કુઞ્જરં તં
મલ્લાંશ્ચાણૂરપૂર્વાનપિ સહસહજો મર્દયન્સ્તુઙ્ગમઞ્ચાત્ ।
ભોજેશં પાતયિત્વા વ્યસુમકૃત નિજાન્ નન્દયન્ પ્રાપ્ય ગર્ગાત્
દ્વૈજં સંસ્કારમાપ્તો ગુરુમથ વિદિતાશેષવિદ્યોઽવતાન્નઃ ॥ ૧૧॥

દત્વા પુત્રં પ્રવક્ત્રે પ્રતિગતમધુરઃ સાન્ત્વયન્નુદ્ધવાસ્યા-
દ્ગોષ્ટસ્થાન્ નન્દપૂર્વાનરમયદબલાં પ્રીતિકૃદ્યઃ શુભસ્ય ।
અક્રૂરસ્યાથ તેન પ્રતિવિદિતપૃથાપુત્રકૃત્યો જરાયાઃ
સૂનું નિર્ભિન્નસેનં વ્યતનુત બહુશો વિદ્રુતં નઃ સ પાયાત્ ॥ ૧૨॥

પુર્યા નિર્ગત્ય રામાદથ સહમુસલી પ્રાપ્ય કૃષ્ણોઽભ્યનુજ્ઞાં
ગોમન્તં ચાપિ મૌલિં ખગપતિવિહિતાં વાસુદેવં સૃગાલમ્ ।
હત્વા શત્રું ચ પુર્યામધિજલધિ પુરીં નિર્મિતાં બન્ધુવર્ગાન્
નિત્યે યઃ સોઽવતાન્નઃ પ્રમથિતયવનો મૌચુકુન્દાક્ષિવહ્નેઃ ॥ ૧૩॥

રાજ્ઞા સંસ્તૂયમાનો હતયવનબલો ભીતવન્માગધેશા-

દ્રોમન્તં પ્રાપ્ય ભૂયો જિતમગધપતિર્જાતશાન્તાગ્નિશૈલઃ ।
આગત્ય દ્વારકાં યો હૃદિકસુતગિરા જ્ઞાતકૌન્તેયકૃત્યઃ
પશ્યત્સ્વાદાય ભૈષ્મીં નૃષુ યુધિ જિતાવાન્ભૂભૃતઃ પ્રીયતાં નઃ ॥ ૧૪॥

વૈરૂપ્યં રુક્મિણો યોઽકૃત મણિસહિતં જામ્બવદ્દેહજાતાં
સત્યાં તેનૈવ યુક્તામપિ પરિજગૃહે હસ્તિનં કુલ્યહેતોઃ ।
યાતો વ્યસ્યાત્ર સત્યાશુચમથ સમગાદ્દ્વારકાં સત્યયેતો
દ્રષ્ટું પાર્થાન્સકૃષ્ણાન્દ્રુપદપુરમગાદ્ધિદ્ધલક્ષ્યાન્સ પાયાત્ ॥ ૧૫॥

કૃષ્ણઃ પ્રાપ્યાથ સત્રાજિદહિતવધકૃધઃ શ્વફલ્કસ્ય સૂનૌ
રત્નં સન્દર્શ્ય રામં વ્યધિત ગતરૂષં દ્રષ્ટુકામઃ પ્રતસ્થે ।
ઇન્દ્રપ્રસ્થસ્થસ્થપાર્થાનથ સહવિજયો યામુનં તીરમાયન્
કાલિન્દીં તત્ર લબ્ધ્વા યમસુતપુરકૃત્ પાતુ માં દ્વારકાસ્થઃ ॥ ૧૬॥

યો જહ્રે મિત્રવિન્દામથ દૃઢવૃષભાન્ સપ્ત બધ્વાઽપિ નીલાં
ભદ્રાં મદ્રેશપુત્રીમપિ પરિજગૃહે શક્ર વિજ્ઞાપિતાર્થઃ ।
તાર્ક્ષ્યરૂઢઃ સભાર્યો હિમગિરિશિખરે ભૌમદુર્ગં સમેત્ય
છિત્વા દુર્ગાણિ કૃન્ત્વા મુરગલમરિણા દેવતેઽવ્યઃ સ માઽવ્યાત્ ॥ ૧૭॥

ત્રિંશત્પઞ્ચાવધીદ્યઃ સચિવવરસુતાન્ ભૂમિજેનાતિઘોરં
યુદ્ધં કૃત્વા ગજાદ્યૈરરિહૃતશિરસં તં વ્યધાદ્ભૂસ્તુતોઽથ ।
કૃત્વા રાજ્યેઽસ્ય સૂનું વરયુવતિજનાન્ ભૂરિશશ્ચારુવેષાન્
પ્રાપય્ય દ્વારકાં સોઽકૃત મુદમદિતેઃ કુણ્ડલાભ્યામવેન્મામ્ ॥ ૧૮॥

ઇન્દ્રારાધ્યોઽમરેન્દ્રપ્રિયતમમગમાહૃત્ય દેવાન્ વિજિત્ય
પ્રાપ્યાથ દ્વારકાં યઃ સુતમતિરુચિરં રુક્મિણીશઃ પ્રપેદે ।
ભ્રાતૃવ્યં પૌણ્ડ્રકાખ્યં પુરરુધમતનોત્ કૃત્તશીર્ષં તદીયા-
પત્યોત્પન્નાં ચ કૃત્યાં રથચરણરુચા કાલયન્ કામધુક્ સ્યાત્ ॥ ૧૯॥

કૃષ્ણઃ સૂર્યોપરાગે નિજયુવતિગણૈર્ભાર્ગવં ક્ષેત્રમાપ્ત-
સ્તત્રાયાતાન્ સ્વબન્ધૂન્ મુનિગણમપિ સન્તોષ્ય યજ્ઞં સ્વપિત્રા ।
યોઽનુષ્ઠાપ્યાપ્ય નૈજં પુરમથ વદિતાઽનેકતત્ત્વાનિ પિત્રે
માતુઃ પુત્રાન્ પ્રદર્શ્યાકૃત હિતમહિતં મેઽપનુદ્યાત્ સ ઈશઃ ॥ ૨૦॥

રુક્મિણ્યા નર્મવાક્યૈરરમત બહુભિઃ સ્ત્રીજનૈર્યોઽથ પુત્રા-
નેકૈકસ્યાં પ્રપેદે દશ દશ રુચિરાન્ પૌત્રકાનપ્યનેકાન્ ।
પૌત્રસ્યોદ્વાહકાલે ભૃશકુપિતબલાદ્રુક્મિણં ઘાતયિત્વા

નન્દન્ યોષિદ્ગણેન પ્રતિગૃહમબલાપ્રીતિકારી ગતિર્મે ॥ ૨૧॥

નાનારત્નપ્રદીપ્તાસમવિભવયુતદ્વ્યષ્ટસાહસ્રકાન્તા-
ગેહેષ્વશ્નન્ શયાનઃ ક્વ ચ જપમગૃયાદીનિ કુર્વન્ ક્વચિચ્ચ ।
દીવ્યન્નક્ષૈર્બ્રુવાણઃ પ્રવચનમપરૈર્મન્ત્રયન્નેવમાદિ-
વ્યાપરાન્નાદરસ્ય પ્રતિસદમહો દર્શયન્ નઃ સ પાયાત્ ॥ ૨૨॥

પ્રાતર્ધ્યાયન્ પ્રસન્નઃ કૃતનિજવિહિતઃ સત્સભાં પ્રાપ્ય કૃષ્ણો
દૂતં રાજ્ઞાં પ્રતોષ્યામરમુનિવિદિતાશેષકૃત્યઃ પ્રયાસીત્ ।
શક્રપ્રસ્થં ચમૂભિર્બહુવિભવયુતં બન્ધુભિર્માનિતોઽયં
ભીમેનાપાત્ય બાર્હદ્રથમથ નૃપતીન્ મોચયન્મે પ્રસીદેત્ ॥ ૨૩॥

પુત્રં રાજ્યેઽસ્ય કૃત્વા હૃતશિરસમથો ચેદિરાજં વિધાય
પ્રોદ્યન્તં રાજસૂયં યમસુતવિહિતં સંસ્થિતં યો વિધાય ।
શક્રપ્રસ્થાત્ પ્રયાતો નિજનગરમસૌ સાલ્વભગ્નં સમીક્ષ્ય
ક્રુદ્ધો ઘ્નન્નબ્ધિગં તં શિવવરબલિનં યાન્ પુરં પાતુ નિત્યમ્ ॥ ૨૪॥

વિપ્રાદાકર્ણ્ય ધર્મં વનગતમનુજૈઃ સાન્ત્વયિત્વૈત્ય સર્વા-
નભ્યેત્ય દ્વારકાં યો નૃગમથ કુજનિં દિવ્યરૂપં ચકાર ।
ગત્વા વૈદેહગેહં કતિપયદિવસાંસ્તત્ર નીત્વાઽતિભક્તૌ
સન્તોષ્ય દ્વારકાં યાન્ બહુબલસમતોઽયન્નુપપ્લાવ્યમવ્યાત્ ॥ ૨૫॥

દૌત્યં કુર્વન્નનન્તા નિજરુચિરતનૂર્દર્શયન્ દિવ્યદૃષ્ટે-
ર્ગીતાતત્ત્વોપદેશાદ્રણમુખવિજયસ્યાચરન્ સારથિત્વમ્ ।
નીત્વા કૈલાસમેનં પશુપતિમુખતો દાપયિત્વાઽસ્ત્રમસ્મૈ
ભીમેનાપાત્ય દુષ્ટં ક્ષિતિપતિમકરોદ્ધર્મરાજં તમીડે ॥ ૨૬॥

પ્રાપ્તઃ સ્થાનં યદૂનાં પ્રિયસખમકૃતાવાપ્તકામં કુચેલં
કુર્વન્ કર્માશ્વમેધં નિજભવનમથો દર્શયિત્વાઽર્જુનાય ।
પુત્રાન્ વિપ્રાય દત્વા સહસહજમસૌ દન્તવક્રં નિપાત્ય
પ્રાપ્યાથ દ્વારકાં સ્વાં સમવતુ વિહરન્નુદ્ધવાયોક્તતત્ત્વઃ ॥ ૨૭॥

રક્ષન્ લોકાન્ સમસ્તાન્ નિજજનનયનાન્દકારી નિરસ્તા-
વદ્યઃ સૌખ્યૈકમૂર્તિઃ સુરતરુકુસુમૈઃ કીર્યમાણોઽમરેન્દ્રૈઃ ।
સિદ્ધૈર્ગન્ધર્વપૂર્વૈર્જયજયવચનૈઃ સ્તૂયમાનોઽત્ર કૃષ્ણઃ
સ્ત્રીભિઃ પુત્રૈશ્ચ પૌત્રૈઃ સ જયતિ ભગવાન્ સર્વસમ્પત્સમૃદ્ધઃ ॥ ૨૮॥

ઇતિ શ્રીકૃષ્ણચારિત્રમઞ્જરી લેશતઃ કૃતા ।
રાઘવેન્દ્રેણ યતિના ભૂયાત્ કૃષ્ણપ્રસાદદા ॥ ૨૯॥

શ્રીરાઘવેન્દ્રતીર્થશ્રીચરણવિરચિતા શ્રીકૃષ્ણચારિત્રમઞ્જરી
ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

NA

---

*Shri Krishnacharitra Manjari*

pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*